Title शिवावलिपटलम्

Author +

Extent ४ Age +

Subject तन्त्रम् . संपूर्णम्

नं० ५६७२-घ
शिवाबलिपटलम् (तन्त्रम्)
पत्राणि ४ (चत्वारि)

~~शिवाबलिपटलः~~

~~नं० १२१२~~

5672
F-4

Complete

Dharma

शिवावलिपटलः ~~२६~~

१६६

नं. २२९२ क
शिवावलि पटलम्
८ पत्राणी
सम्पूर्ण



ॐ नमो विघ्नहर्त्रे ॐ नमः शिवाय पुत्रप्रदमपुत्राणां दरिद्राणां
१ धनप्रदं क्षीणायुः प्राप्नमृत्युर्वा महारोगहतोपि वा १ सद्यः सु
खमवाप्नोति शिवाबलिविधानतः भूतप्रेतपिशाचाश्च यक्षगं
धर्वकिन्नराः २ तृप्ता भवंति देवेशि शिवाबलिविधानतः अत्र
गुह्यं प्रवक्ष्यामि सावधानतया शृणु ३ अथ मासविशेषः मा
घफाल्गुणवैशाखश्रावणमार्गशीर्षकौ कार्त्तिकेपि च कर्त्तव्या
सर्वसिद्धिभाग्भवेत् ४ अथ तिथिविशेषः कालीतंत्रे अष्ट
म्यां च चतुर्दश्यां संक्रांतौ ग्रहणेपि च पौर्णमास्याममायां वा प्र
कर्त्तव्या शिवाबलिः ५ अथ वारविशेषः यदुक्तं मुंडमालातं
त्रे रवौ तु सर्वसौभाग्यं सोमे सौम्यं कलाप्नये बुधे धनं गुरौ राज्यं

सुकें स्त्रीवश्यकर्मणि शनिवारे रोगशांत्यै कर्त्तव्या चशिलावलिः ५

अथ नक्षत्रविशेषः यदुक्तं मुड्डीशे अश्विन्यां वा मृगे वापि पुष्ययु

ग्मे त्रयोत्तरे मूलमार्द्रीमघा चापि कर्त्तव्या चशिवावलिः ७ अथ

योगविशेषः यदुक्तं वीरतंत्रे विष्कुंभे प्रीतियोगे च आनंदे साध्य

सिद्धिके ब्रह्मैंद्रौ वैधृतौ चापि व्यतीपाते च कारयेत् ८ अथका

लविशेषः यदुक्तं फेत्कारिणीतंत्रे वटाश्वत्थकदंबानां कादंब

र्य्यास्तथैव च कीलानि कारयेद्धीमान्पूर्वादिक्रमतो न्यसेत् ९

अथ कीलमंत्रः पूर्वे ॐ क्रीं क्रीं ऐं ऐं श्रीं इंद्राय ऐं ल्रीं ग्लौं गणेशाय

नमः क्रीं वज्रसहितं क्रीं क्रीं ऊं ऊं इंद्रमंडलं कीलय २ ऊं फट् स्वा

हा १ आग्नेय्यां ॐ ऐं प्रें स्फें अं रं अग्नये शाक्तये नमः अग्निमंडलं की

लयर स्वाहा ३ दक्षिणे ॐ ऐं स्त्रीं क्रीं छ्रां छ्रीं छ्रुं यमाय दंडाय सु
२ क्षेत्रपालाय नमः क्रीं क्रैं कीलय २ स्वाहा ३ नैर्ऋत्यां ॐ क्रीं निर्ऋ
2 ते नैर्ऋत्ये खड्ग सहिताये नैर्ऋत्य मंडलं क्रीं क्रैं कीलय २ स्वाहा ४
पश्चिमे ॐ क्रीं क्रीं ङ्कं ङ्कं वारुणीं वरुण सहितां यं ऐं ल्लीं डुं डुर्गे या
श सहित वरुण मंडलं कीलय २ स्वाहा ५ वायव्ये ॐ क्रीं ल्कीं।
क्रीं वायव्ये अंकुशाय ल्कीं क्रीं क्रीं वायु मंडलं कीलय २ स्वाहा ६
उत्तरे ॐ क्रीं ल्कीं ल्कीं श्रीं कुवेराय गदाये क्रीं वटुकनाथाय कुवेर
मंडलं कीलय २ स्वाहा ७ ईशान्ये ॐ क्रीं क्रीं जुं सः क्रौं शिवाय
त्रिशूल सहिताय ईशान मंडलं कीलय २ स्वाहा ८ ऊर्ध्वे ॐ
क्रीं मंडल ब्रह्मणे कमंडलु सहिताय ब्रह्म मंडलं कीलय २ स्वाहा ९

पाताले ॐ ह्रीं ग्रं ह्रीं ग्रौं ह्रीं सः अनंताय चक्रधराय पातालमंड
लं कीलय २ स्वाहा ९ इति दशदिक्पालबलिं दुग्धेनासवेन च
सकल्पलड्डुकेन वा मांसेन वा क्षीरपाकेनेवा माषान्नेन वा वलिर्दे
या सस्तुरयावाविशेषः इति मंडलं अथ शिवाबलिमंत्रः ॐ ह्रीं
शिवे सर्वदानंदे सर्वकामार्थसिद्धिदे इदं बलिं प्रदास्यामि कार्य
सिद्धिर्भवेत्तु मे ॐ क्रौं क्रौं शिवे आगच्छ आगच्छ सर्वतो मां रक्ष २ इदं
वलिं गृह्ण २ गृह्णपय२ ह्रीं क्रीं सौः फट् स्वाहा एकविंशतिवारं
इमं मंत्रं पठेत्सुधीः ततः प्रदास्येत बलिं गुरुमार्गानुसारतः ॐ
चमायै पूर्वकोणे ॐ ह्रीं रमायै दक्षिणे ॐ सदासुखदात्र्यै पश्चिमे
विन्यसेत्सुधीः ॐ ह्रीं ह्रीं उत्तरे देव्यै पुलिंदिन्यै नमः माहेश्वर्यै

नम ईशान्यै क्लीं सुरेशान्यै नमः वायव्ये क्लीं सदोग्रायै नमो नैर्ऋत्ये
२ क्लीं प्रमोदायै नमः आग्नेय्ये क्लीं मदोत्कटायै नमः स्वाहा तेनाहुतिं
3 दद्यादेवं कुर्य्याच्छिवाबलिं इतिशिवाबलिः अथ वाक्यविशेषः प्रा
क्शिरः प्राप्यते विद्यां धनलाभस्तु दक्षिणे पश्चिमे प्रबलाचिंता हा
निर्मृत्युस्तथोत्तरे आग्नेय्यां दुष्टमरणं नैर्ऋत्ये प्रियदर्शनं वायव्ये
शत्रुसंसर्गो ईशान्ये दुःखनाशनम् अथ दीपविशेषः घृततैलं तथा
निंबबीजं धत्तूरतैलकं सुगंधतिलतैलेन दीपो देयं सदा बुधैः नदी
तटे तडागे वा शून्यागारे चतुष्पथे सर्वदा सर्वभावेन कर्तव्या च शिवा
बलिः १६ सुद्धासने विशेद्धीमान्न्यासजालं ततो न्यसेत् मूलेन पू
जयेदादौ मंडलं तु विधानतः पश्चान्मंत्रं जपेत्प्राज्ञः षट्सतत्त्व-

सहस्रकं त्रिशतं शतमेकं वा ततः साध्यः शिवाबलिः येये प्रयो
गास्तंत्रेषु ते ते सिद्ध्यंत्यसंशयः सिध्यंति साध्या देवेशि शिवाबलि
विधानतः २८ न देयं परशिष्येभ्यो न देयं तु दुरात्मने विश्वासघा
तकेभ्योपि स्वप्नांतेन प्रकाशयेत् गोप्यं गोप्यं पुनर्गोप्यं विद्यै-
षा त्यागमा जगुः ॥ इति श्री रुद्रयामले तंत्रे प्रत्यक्षसिद्धिप्रदे उ
त्तरपटले पूजाखंडे ईश्वरपार्वतीसंवादे शिवाबलिकथनं ना
माशीतिचत्वारिंशत्तमः पटलः समाप्तः ॥ ॥